शिखावला, स्त्री, ( शिखा+वलच् । टाप् । ) मयूरशिखा । इति राजनिर्घण्टः ॥

शिखावान्, [त्] पुं, ( शिखा विद्यतेऽस्य । शिखा +मतुप् । मस्य वः । ) अग्निः । चित्रकवृक्षः । इत्यमरः ॥ केतुग्रहः । इति शब्दरत्नावली ॥ शिखायुक्ते, त्रि ॥ (यथा, मनौ ।१ । ३८ श्लोके । "केतवः शिखावन्ति ज्योतींषि ।" इति मेधातिथिकुल्लूकौ ॥ )

शिखावृक्षः, पुं, (शिखाया वृक्षः इव ।) दीपवृक्षः । इति शिखातरुशब्ददर्शनात् ॥

शिखावृद्धिः, स्त्री, (शिखेव वृद्धिर्यस्याः ।) कायिका वृद्धिः । प्रात्यहिकदेयलाभः । इति स्मृतिः ॥

शिखिकण्ठं, क्ली, ( शिखिनो मयूरस्य कण्ठ इव आकृतिर्यस्य । ) तुत्थम् । इति रत्नमाला ॥

शिखिग्रीवं, क्ली, (शिखिनः ग्रीवेव आकृतिर्यस्य ।) तुत्थम् । इत्यमरः ॥

शिखिध्वजः, पुं, (शिखिनो वह्नेर्ध्वज इव ।) धूमः । इति त्रिकाण्डशेषः ॥ ( शिखी मयूरो ध्वजो यस्य । ) कार्त्तिकेयः । इति शब्दरत्नावली ॥

शिखिनी, स्त्री, ( शिखा विद्यतेऽस्याः । इनिः । स्त्रियां ङीप् । ) मयूरशिखा । इति राजनिर्घण्टः ॥

शिखिपुच्छं, क्ली, ( शिखिनः पुच्छम् । ) मयूरपिच्छम् । यथा,—

"शिखण्डोऽस्त्री पिच्छबर्हे शिखिपुच्छशिखण्डके ॥"

इति शब्दरत्नावली ॥

शिखिप्रियः, पुं, ( शिखिनः प्रियः । ) लघुवदरः । इति राजनिर्घण्टः ॥

शिखिमण्डलः, पुं, वरुणवृक्षः । इति शब्दरत्नावली ॥

शिखिमोदा, स्त्री, ( शिखिनं मोदयतीति । मुद्+णिच्+अच् । टाप् । ) अजमोदा । इति राजनिर्घण्टः ॥

शिखियूपः, पुं, श्रीकारी मृगः । इति राजनिर्घण्टः ॥

शिखिवर्द्धकः, पुं, (शिखिनं जठराग्निं वर्द्धयतीति । वृध+ण्वुल् ।) कुष्माण्डः । इति शब्दरत्नावली ॥

शिखिवाहनः, पुं, (शिखी वाहनं यस्य ।) कार्त्तिकेयः । इत्यमरः ॥

शिखिव्रतं, क्ली, ( शिखिनो व्रतम् । ) व्रतविशेषः । यथा,—

ब्रह्मोवाच ।

"वक्ष्ये प्रतिपदादीनि व्रतानि व्यास शूयताम् ।
प्रतिपद्येकभक्ताशी समाप्ते कपिलाप्रदः ।
वैश्वानरपदं याति शिखिव्रतमिदं स्मृतम् ॥"

इति गारुड़े १२६ अध्यायः ॥

शिखी, [न्] पुं, ( शिखास्यास्तीति । शिखा+"व्रीह्यादिभ्यश्च ।"५ । २ । ११६ । इति इनिः ।) मयूरः । ( यथा, ऋतुसंहितायाम् । ३ । १८ ।

"शिखिपत्रनिभः सलिलं न करोति ह्लादशब्दानि ॥")

अग्निः । ( यथा, महाभारते । ४ । ५१ । ६ ।

"खड़्गी च धन्वी च विभाति पार्थः
शिखी वृतः स्रुग्भिरिवाज्यसिक्तः ॥")

चित्रकवृक्षः । इत्यमरः । बलीवर्द्दः । शरः । केतुग्रहः । द्रुमः । कुक्कुटः । इति मेदिनी ॥ घोटकः । इति हेमचन्द्रः ॥ अजलोमा । इति रत्नमाला ॥ सितावरः । मेथिका । इति राजनिर्घण्टः ॥ पर्व्वतः । ब्राह्मणः । दीपः । इति केचित् ॥ शिखायुक्ते, त्रि । इति मेदिनी ॥

शिग्रुः, पुं, ( शेते स्वल्पेपि वायौ । शी+"जत्रादयश्च ।"उणा० ४।१०२। इति रुः। ह्रस्वो गुणाभावश्च । ) शाकम् । इत्यमरः ॥ वृक्षविशेषः । शजिना इति भाषा । तत्पर्य्यायः । हरितशाकः २ शाकपत्रः ३ सुपत्रकः ४ उपदंशः ५ चमादंशः ६ कोमलपत्रकः ७ बहुमूलः ८ दंशमूलः ९ तीक्ष्णमूलः १० । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । तीक्ष्णत्वम् । वातकफमुखजाड्यव्रणदोषहरत्वम् । दीपनत्वम् । रुच्यत्वञ्च । तस्य पत्रशाकगुणाः । रुच्यत्वम् । वातकफक्रिमिनाशित्वम् । कटुत्वम् । उष्णत्वम् । दीपनत्वम् । पथ्यत्वम् । पाचनत्वञ्च ॥ * ॥ अपि च ।

"शोभाञ्जनो नीलशिग्रुस्तीक्ष्णगन्धो जनप्रियः ।
मुखमोदः कृष्णशिग्रुश्चक्षुष्यो रुचिराञ्जनः ॥
शोभाञ्जनस्तीक्ष्णकटुः स्वादूष्णः पिच्छिलस्तथा ।
जन्तुवातार्त्तिशूलघ्नश्चक्षुष्यो रोचनः परः ॥*॥
श्वेतशिग्रुः सुतीक्ष्णः स्यान्मुखभङ्गः सिताह्वयः ।
सम्वलः श्वेतमरिचो रोचनो मधुशिग्रुकः ॥
श्वेतशिग्रुः कटुस्तीक्ष्णः शोफानिलनिकृन्तनः ।
अङ्गव्यथाहरो रुच्यो दीपनो मुखजाड्यनुत् ॥*॥
रक्तको रक्तशिग्रुः स्यान्मधुरो बहुलच्छदः ।
सुगन्धिः केशरी सिंहो मृगारिश्च प्रकीर्त्तितः ॥
रक्तशिग्रुर्महावीर्य्यो मधुरश्च रसायनः ।
शोफाध्मानसमीरार्त्तिपित्तश्लेष्मापसारकः ॥"

इति राजनिर्घण्टः ॥

(ब्राह्मणस्याभक्ष्या तद्भक्षणनिषेधो यथा मनौ । ६ । १४ ।

"वर्ज्जयेन्मधुमांसञ्च भौमानि कवकानि च ।
भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च ॥"

"शिग्रुकं वाहीकेषु प्रसिद्धं शाकम् ।" इति मेधातिथिकुल्लूकौ ॥ )

शिग्रुजं, क्ली, ( शिग्रोर्ज्जायते इति । जन+डः । ) शोभाञ्जनबीजम् । तत्पर्य्यायः । श्वेतमरिचम् २ । इत्यमरः ॥ शिग्रुभवे, त्रि ॥

शिग्रुबीजं, क्ली, ( शिग्रोर्ब्बीजम् । ) शोभाञ्जनबीजम् । इति शब्दचन्द्रिका ॥

शिघ, इ आघ्राणे । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-सक०-सेट् । ) इ, शिङ्घते । इति दुर्गादासः ॥

शिङ्घाणं, क्ली, (शिङ्घ+आणकः । पृषोदरादित्वात् कलोपः । इत्युणादिवृत्तौ उज्ज्वलदत्तः ।३।८४।) काचपत्रम् । लोहमलम् । नासिकामलम् । इति मेदिनी ॥ शिक्नि इति भाषा ॥

शिङ्घाणकः, पुं, (शिङ्घते इति । शिघ+"आणको लूधूशिंघिधाञ्भ्यः ।" उणा० ३ । ८३ । इति आणकः । ) श्लेष्मा । इत्युणादिकोषः ॥

शिङ्घाणकः, पुं क्ली, (शिङ्घ+आणकः ।) नासिकामलम् । इत्युणादिकोषः ॥

शिङ्घितं, त्रि, ( शिङ्घ+क्तः । ) घ्रातम् । इति शब्दरत्नावली ॥

शिञ्ज, इ ल कि ङ अस्फुटध्वनौ । इति कविकल्पद्रुमः ॥ ( चुरा०-पक्षे भ्वा०-अदा० च-आत्म०-अक०-सेट् । ) अस्फुटध्वनिरिह भूषणकर्त्तृक एव । भूषणानान्तु शिञ्जितमित्यमरात् । इ, शिञ्जते । ल ङ, शिङ्क्ते । कि ङ, शिञ्जयते शिञ्जते मञ्जीरम् । ताले: शिञ्जद्वलयसुभगैर्न्नर्त्तितः कान्तया मे इत्यत्र शिञ्जदिति शतृप्रत्ययान्तत्वादिति रमानाथः । वस्तुतस्तु शिङ्क्ते शिञ्जः पचादित्वादन् ततः शिञ्ज इवाचरतीति क्वौ शत्रन्तम् । इति दुर्गादासः ॥

शिञ्जा, स्त्री, ( शिजि अव्यक्तशब्दे+"गुरोश्च हलः ।" ३।३।१०३ । इत्यः । टाप् । ) भूषणशब्दः । इति शब्दरत्नावली ॥ धनुर्गुणः । इति हेमचन्द्रः ॥

शिञ्जितं, क्ली, ( शिञ्ज+क्तः । ) भूषणध्वनिः । इत्यमरः ॥ ( यथा,—

"नखानि विधुशङ्कया विरहिणी करेणावृणोत्
ततः किशलयभ्रमात् स्वयमथाग्निपद्दूरतः ।
ततो वलयशिञ्जितं भ्रमरगुञ्जिताशङ्कया
उहूरिति कुहूरवध्वनिधिया ततो मूर्च्छिता ॥"

इत्युद्भटः ॥)

शिञ्जिनी, स्त्री, ( शिञ्जति आहृष्टसती शब्दायते इति । शिञ्ज+णिनिः । स्त्रियां ङीप् । ) धनुर्गुणः । इत्यमरः ॥ नूपुरः । इति हेमचन्द्रः ॥

शिञ्जी, [न्] त्रि, भूषणशब्दविशिष्टः । शिञ्जा विद्यतेऽस्य इत्यर्थे इनप्रत्ययेन निष्पन्नः ॥

शिट, अनादरे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) शेटति खलं लोकः । इति दुर्गादासः ॥

शिण्डाकी, स्त्री, खाद्यद्रव्यविशेषः । यथा,—

"शिण्डाकी राजिकायुक्तैः स्यान्मूलकदलद्रवैः ।
सर्षपखरसैर्व्वापि शालिपिष्टकसंयुतैः ।
शिण्डाकी रोचनी गुर्व्वी पित्तश्लेष्मकरी स्मृता ॥"

इति राजनिर्घण्टः ॥

शितं, त्रि, ( शो तनूकरणे+क्तः । "शाच्छोरन्यतरस्याम् ।"७ । ४ । ४१ । इति इकारादेशः । ) दुर्ब्बलः । निशितः । इति मेदिनी ॥ ( यथा, रघौ । ६ । ४२ ।

"धारां शितां रामपरश्वधस्य
सम्भावयत्युत्पलपत्रसाराम् ॥")

तनुः । इति विश्वः ॥ ( पुं, विश्वामित्रगोत्रीय ऋषिः । यथा, महाभारते । १३ । ४ । ५३ ।